*IOSR Journal Of Humanities And Social Science (IOSR-JHSS)*
*Volume 21, Issue 1, Ver.III (Jan. 2016) PP 28-31*
*e-ISSN: 2279-0837, p-ISSN: 2279-0845.*
*www.iosrjournals.org*

# हिन्दुमुसलमानयोरैक्यम्

Sanghamitra Biswas,
*Associate Professor in South Calcutta Girls' College, Kolkata.*

सर्व्वेषां धर्म्माणां मूलनीतयः सत्यमहिंसासदाचारादयः। कुत्रापि कस्मिन्नपि धर्म्मे हननघर्षणादीनां स्थानं नास्ति। अधिकांशेषु धर्म्मेषु ईश्वरः जगत्स्रष्टा जीवानां रक्षकः इत्युच्यते। वयं पश्यामः यत् सर्व्वे विविधधर्म्मीयाः मनुष्याः एकस्यामेव पृथिव्यां वसामः। अतः विविधाः ईश्वराःविविधधर्म्मसम्मताः न सन्ति, न वा तैः सृष्टाः विविधाः पृथिव्यः। अतः एका एव पृथिवी अस्ति। अत्रास्ति एकः ईश्वरः। तमीश्वरः आल्लाह् गड् इत्यभिधाभिः विविधधर्म्मीयाः मनुष्याः वर्णयन्ति।

भारतवर्षे हिन्दुमुसलमानयोः विरोधः सुविदितः। सम्प्रदायद्वयमीश्वरस्य एकमेव रूपमर्चयतीति विस्मयकरम्। हिन्दवः ईश्वरस्य विभिन्नानि रूपानि अर्चयन्ति शिवकालीनारायणदेवानां रूपेन सर्व्वे जानन्ति। मुसलमानाः आल्लाहोपासकाः निराकारमीश्वरमुपासते। पुनस्ते सत्यपीरादिम् ईश्वरस्य साकाररूपमुपासते हिन्दुभिः सह।

सुन्दरवनं गमनागमनकारिणः हिन्दुमुसलमानाः वने विपत्शून्याः स्थास्यन्तीति आशया यात्राशुभत्वार्थञ्च वनविविमुद्दिश्य पूजां ददाति। यदा सा मुसलमानसमाजे पूज्यते, तदा तस्याः आकृतिः वेशवासश्च मुसलमानवालिकावत् भवति। तस्याः वेणीवद्धः केशः, मस्तके टिक्ली, गलदेशे विविधाः हारयष्टयः वनपुष्पमाल्यानि च वन्यलताङ्कितटुपि, परिधाने पिरानघाघरापाजामाउडनी इति वस्त्राणि पदद्वये पादुका मोजा इत्यादयः दृश्यन्ते। मुसलमानपल्ल्यां वनविवेः दरगायां फकीराः पूजाहाजोत् निवेदयन्ति, विवेः सिरणीं च कुर्व्वन्ति।

वनविवेः दरगायां हिन्दवश्च पूजामर्पयन्ति प्रसादफलानि च गृ ह्णन्ति।

हिन्दुपल्ल्यां वनविविः भिन्नरूपा। सा हरिद्रावर्णविशिष्टा, मुकुटशोभिता, वनपुष्पमाल्यधारिणी सर्व्वालङ्कारभूषिता हस्ताक्षिद्वयविशिष्टा। तस्याः क्रोड़े शिशुः शोभते, कदापि वा सा व्याघ्रोपविष्टा शिशुं विना प्रहरणं विना च।

गवेषकाणां मतेन १) वनविविः हिन्दुदेवी वनदुर्गा वनचण्डी वनषष्ठी विशालाक्षी वा। मुसलमाननां प्राधान्यकाले सा वनविविरभवत्। २) एषा हिन्दुमुसलमानधर्म्मचिन्तायाः मिश्रिता अरण्यदेवी। ३) आदिपाठानयुगस्य मुसलमानी साधिका इसलामधर्म्मप्रचारिका अभिजाता नारी या मुसलमानसमाजे वहुजनपूज्या आसीत्, पश्चात् भक्तिप्रावल्येन देवीपदे उन्नीता भवति। अस्याः देव्याः पूजोत्पत्तिकेन्द्रे दक्षिणचव्विशपरगणायां दक्षिणखुलनाजेलायां वा हिन्दुमुसलमानयोर्मध्यात् सद्भावात् सा उभयसम्प्रदायं निकषा स्वीकृता। हिन्दुमुसलमानकवयः अस्याः देव्याः माहात्म्यप्रचारार्थं मङ्गलकाव्यानि रचितवन्तः। तेषु 'वोनविविर जहुरानामा' विशेषरूपेण ख्यातः। एतन्मङ्गलकाव्यं वनविविः नारायण्या सह युद्धस्याख्यानम् मुन्सीवयनद्दिना रचितम्।

हिन्दुभिः पूजितः कालुरायः व्याघ्रकुम्भीरदेवता आत्मनः पूजास्थाने एककाः। कस्यापि भ्रातृरूपेण सहचररूपेण वा सः न विराजते।

मुसलमानप्रधानेषु स्थानेषु कालुरायः वड़खाँगाजिनः भ्रातृरूपेण सहचररूपेण वा भिन्नमूर्तिविशिष्टः। तदा एषः कृष्णवर्ण नुरश्मश्रुविशिष्टः मगरपीरः कालुः गाजी।

ओलाइचण्डीदेवी हिन्दुभिः कल्पिता अतिसुश्रीरूपेण। हरिद्रावर्णा दीर्घनेत्रा प्रसारितहस्ता ओष्ठकर्णनासिकानां सौन्दर्यविशिष्टा दण्डायमाना शिशुं क्रोड़े नीत्वा उपविष्टा वा, वाजुगोटमाकड़िचुड़िनथहारचिक सर्व्वालङ्कारभूषिता मुकुटशोभिता कदाचिद्वा मुक्तकेशी वाहनविहीना प्रहरणहीना नीलशाटिकाधारिणी।

मुसलमानप्रधानेषु स्थानेषु देव्यः परिधाने किशोरीवत् वेशः पिरानपाजामाटुपि उड़नी च। सर्व्वालङ्कारभूषिता टिकलिझुमकोटायरानाकछाविहाँसुलिवाउटिगोटादिभिः। पदद्वये नागराजुता मोजा च हस्ते आसादण्डः। अस्याः देव्याः पूजायां सर्वत्र मुसलमानप्रभावोऽस्ति। ओलाइचण्डी ओलाविवि वा सप्तभगिन्यः – ओलाविविः झोलाविविः आजगैविविः चाँदविविः वाहड़विविः झेटुनेविविः आसानविविश्च। सप्तदेवीनां पूजास्थानं 'सानविविर थान' माहात्म्यकाव्यं 'सानविविर गान' इति। केनचित् गवेषकेण यदुच्यते एताः सप्तविवयः शास्त्रोक्ताः सप्त मातृकाः महेश्वरी वराही व्राह्मी इन्द्राणी वैष्णवी इत्यादयः, तन्न प्रमाणैः समर्थितम्। शास्त्रोक्तदेवीनां पूजाचारेण सह एतासां देवीनां पूजाचारे विशेषं सादृश्यं नास्ति, यद्यपि आकृतिसादृश्यमस्ति शास्त्रोक्तदेवीभिः सह। किन्तु ओलाइचण्डीति देवीनां पूजाचारेण सह सादृश्यं दृश्यते वाँकुड़ावीरभूमजेलाद्वयस्य ग्रामेषु पूजितानां रङ्गिनीचमकिनीसनकिनीति 'सानवउनी' देवीनां जङ्गलमहले च पूजितानां जयमालादेव्याः सप्त भगिनीनां वासलिचण्डीविलासिनीनां पूजाचारस्य। अतः विशिष्टेन गवेषकेणोच्यते यत् एताः सप्तदेव्यः 'सानविवि' अभवत्। श्रीविनयघोषेण तथोच्यते "এই বনদেবীরা দক্ষিণবঙ্গে আসিয়া মুসলমান আমলে 'সাতবিবি' হইয়াছেন।" सप्तसु भगिनीसु ओलाविविः ओलाइचण्डी वा प्रधाना। कुत्रचित् हामवसन्तस्य अधिष्ठात्री झोलाविविश्च पूजिता मर्यादया।

ओलाइचण्ड्याः पूजायां पौरोहित्ये सर्व्ववर्णसम्प्रदायस्य नार्यश्च अधिकारोऽस्ति। डोमाः यत्र अस्याः पूजापुरोहितः भवन्ति, तत्र पशुपक्षिणां वलिर्भवति, अन्यथा निरामिषं नैवेद्यं दीयते। वेलगाछियायाम् ओलाइचण्डीमन्दिरे यश्चित् कश्चित् नरः मुसलमानः ख्रीष्टानोऽपि पूजादाने अधिकारी। तत्र शनिमङ्गलवारे छागवलिः भवति।

पूजकः यदा मुसलमानः फकिरः ओलाइचण्डी ओलाविविः इति कथ्यते। ओलाविवेः पूजायां नैवेद्यं सन्देशवातासापानसुपारि च, पूजादातारः हिन्दुमुसलमानाः सर्व्वे नैव्येद्यग्राहकाश्च सर्व्वे ते। ओलाविवेः पूजायां विशेषः मन्त्रः नास्ति, कदाचित् हिन्दुना पुरोहितेन पूजाकाले उच्यते "এস মা ওলাবিবি, বেহুলা রাঢ়ির ঝি"। अस्यार्थः पुरोहितेनापि न ज्ञायते। *

दक्षिणवङ्गस्य लौकिकस्य देवस्य वड़ खाँ गाजी इत्यस्य पूजास्थानकर्तारः फकिराः। किन्तु एषः ग्रामस्य हिन्दुमुसलमानयोः उभयोः देवः। एते पूजान्ते सुरेण वदन्ति –

"গাজী মিঞার হাজোত
সিন্নি সম্পূর্ণ হল।
হিন্দুগণে বল হরি
মোমিনে আল্লা বল॥"

वड़ खाँ गाजी युवदशायां पितृधनं त्यक्त्वा इसलामधर्म्मप्रचारार्थं फकिरः भूत्वा सुन्दरवनमागच्छति। तत्र दक्षिणरायेन सह गाजिनः संघातोऽभवत्। ईश्वरः कृष्ण-पयगम्वररूपेण तं विरोधं हृसयति। तत्र दृश्यते-

"ক্ষিতি করে টলমল
হেন বুঝি যায় তল
বিকল সব দেবগণ।
কবি কৃষ্ণরাম ভনে
দুই সিংহ যেন রণে
কার না করিহ অল্প বোধ।
শুন অপরূপ কথা
ঈশ্বর আসিয়া তথা
উত্তরিলা ভাঙ্গিতে বিরোধ।"

ईश्वरेण संघातः दूरीकृतः। संघातमनु देवयोर्मध्यात् हिन्दुमुसलमानयोर्मध्यात् च संघातः दूरीभूतः। दक्षिणचव्विशपरगणायां गाजीदेवस्य थाने 'वाउनगाजी' इत्यभिधीयते, यद्यपि मूर्तौ व्राह्मणस्य किमपि चिह्नं नास्ति।

युद्धमनु सन्धिरभवत्। किन्तु आक्रमणकारिणः मुसलमानाः कथं पूज्याः भवन्ति ? एतद्विषये अनुमीयते यत् भारते मुसलमानराज्यप्रतिष्ठायाः पूर्वं समाजे उच्चनिम्नवर्णयोर्मध्यात् आन्तरिकः सम्वन्धः नासीत्। निम्नवर्णाः अभिजातदेवतापूजने अधिकारिणः नासन्। ततः उच्चश्रेणिहिन्दुभिः सह इसलामधर्म्मप्रचारका नां विरोधोऽभवत्, शास्त्रीयान् देवान् ते दूरीकुर्व्वन्ति। इसलामधर्म्मप्रचारकाणां कार्याणि अनुन्नताः हिन्दवः काङ्क्षन्ति। ततः कालक्रमेण पीरगाजी त्यादयः देवासनं प्राप्तवन्तः।

पीरगाजीत्यादयः मुसलमानशासकानां घनिष्ठाः आसन्। जातिधर्म्मनिर्विशेषेण तुष्टाः पीराः प्रभावशालिनः जनानामुपकारं साधयन्तीति दृष्टान्तोऽस्ति। घुटियार्यः पीरः मोवारक गाजी भूस्वामिनं मदनरायं तत्कालीनस्य नवावस्य क्रोधात् रक्षितवान्। अपि च पीरगाजीत्यादयः जानन्ति यत् दृढ़मूले संस्कारः न दूरीभवनयोग्यः। अतः लोकधर्म्मेण ते सख्यं कुर्व्वन्ति, एवम् अनुन्नतान् निम्नवर्णान् हिन्दुजनान् निकषा ते जनप्रियाः भवन्ति।

आलोच्यस्य गाजीसाहेवस्य गुणाः जनान् मुग्धवन्तः, तस्माद्वा उपकृताः जनाः गाजीं भक्तिं कुर्व्वन्ति। कालक्रमेण जनानां कयाचित् आदिव्याघ्रदेवतया गाजीसाहेवः मिश्रितः भूत्वा व्याघ्रदेवता वड़ खाँ गाजी अभवत्। प्रसङ्गतः उल्लेख्यं यत् वड़ खाँ गाजी, जिन्दापीरः कस्यापि नाम न। ते इसलामप्रचारकेषु शीर्षस्थानीयाः।

हुगलिजेलायाः त्रिवेण्याम् कश्चित् 'वड़ खाँ' समाधिरस्ति। एषः वड़ खाँ जाफर खाँ आलोच्यस्य वड़ खाँ गाजिनः सादृश्ययुक्तः। जाफर खाँ दरा फखाँ इति नाम्ना वहुगङ्गास्तोत्रँ रचितवान्। वड़ खाँ गाजी अपि गङ्गाभक्तः आसीत्। अस्य वड़ खाँ इत्यस्य उद्देश्ये रचितेषु काव्येषु गङ्गादेवी अस्य मासीमाता इति दृश्यते। 'गाजीर पटे' इत्यत्र गङ्गादेव्याः मूर्तिश्चित्रिता इति दृश्यते। द्वौ एतौ वड़ खाँ अभिन्नौ न वेति गवेषणासापेक्षः संवादः।

सातविविः सप्तभगिन्यः वा हिन्दुप्रधानेषु स्थानेषु लक्ष्मीसरस्वतीवत् सुन्दर्यः भवन्ति। मुसलमानस्थाने देवी मुसलमानवालिकावत् वेशं करोति।

जनानां मुखेषु दक्षिणचव्विशपरगणायां प्रचलितात् सातविवेः सङ्गीतात् ज्ञायते यत् अधार्मिकाः जनाः खोदां विस्मरन्ति। तत्प्रतिविधानार्थं खोदा तस्य सप्तमानसकन्याः पृथिवीं प्रेरयति एकैकरोगाधिष्ठातृरूपेण, अन्यथा जनाः ताः न स्वीकरिष्यन्ति। अतः सातविविषु ओलाविविः विसूचिकायाः, जोलाविवि हामवसन्तस्य, मड़िविविः सान्निपातिकस्य ज्वरस्य विकारस्य अधिष्ठात्र्यः। सातवउनी सातवोन मुसलमानयुगे सातविवौ परिणमते।

पीरः गोराचाँदः हिन्दुमुसलमानयोः उभययोः पूज्यः। फकिराः विशवत्सरपूर्वेऽपि नक्तं समग्रपल्ल्यां कृष्णवस्त्रपरिहिताः नराणां गृहद्वारम् अभाषत "पीरः गोराचाँदः मुस्किल आसान"। गोराचाँदस्य यथार्थः नाम सैयद आव्वास आलिः। इसलामप्रचारकः सः राज्ञे चन्द्रकेतवे इसलामधर्म्मदानार्थम् उद्युक्तोऽभवत्, यद्यपि तस्य साफल्यं नायातम्।

स्थानीयाः हिन्दुमुसलमानाः रङ्किनीति देवीं पूजयन्ति।

लौकिकदेवताद्वयस्य वड़खाँगाजीदक्षिणरराययोः युद्धछलेन हिन्दुमुसलमानयोरैक्यं वर्ण्यते। देवयोः घोरयुद्धस्य समापयितुकामः विधाता ईश्वरः अर्द्धहिन्दु-अर्द्धमुसलमानरूपं धारयित्वा युयुधानयोर्मध्यात् आविर्भूतोऽभवत्। कृष्णरामस्य रायमङ्गले अपूर्वा सा वर्णना –

অর্ধের মাথায় কালা একভাগে চূড়া টানা
বনমালা ছিলিমিলি হাথে।
ধবল অর্ধেক কায় অর্থনীল মেঘ প্রায়
কোরাণ পুরাণ দুই হাতে॥

ईश्वरं दृष्ट्वा गाजीदक्षिणरायौ स्तब्धौ अभवताम्। -

এইরূপ দরশন পাইয়াছে দুইজন
ধরিয়া পড়িল দুই পায়।
তুলিয়া অখিল নাথে বুঝাইয়া হাতে হাথে
দুইজনে দোস্তানি পাতায়।

लोकदृष्ट्या देवताद्वयस्य कलहम्, तन्निवारणार्थम् ईश्वराविर्भावः – अत्र देवेश्वरयोः भेदः दृश्यते, देवद्वयस्य च। ईश्वरेण तु पुनः उस्यते -

তুমি যেই সেই রায় বর্বর লোকেতে তায়
ভেদ করে দুঃখ পায় নানা।

शेषतः तदभेददर्शनम्।

धर्म्मप्रतिष्ठाकाले प्रचारकाले वा भिन्नधर्म्मावलम्विषु विरोधः, पश्चात् समन्वयोऽपि भवतः, तद्दृश्यते गाजीदक्षिणराययोः उपासकेषु। अतः वङ्गदेशस्य सुन्दरवने सम्प्रदायद्वयस्य देवताद्वयः एकत्रितया पूज्यते। गाजिनः प्रतीके समाधौ वेद्याम् स्थापितः चित्रितघटः 'वारा' दक्षिणरायप्रतीकः। अपि च वारा नैकः, द्वौ। एकस्मिन् वारायां चित्रं गुम्फयुक्तस्य, अन्यस्मिन् गुम्फहीनस्य श्मश्रुयुक्तस्य। गुम्फयुक्ता दक्षिणरायस्य वारा, श्मश्रुयुक्तगण्डदेशस्य वड़खाँगाजिनः इति मन्यते, यतः प्राचीनसंस्कृतेः वाहकाः मुसलमानाः गुम्फविहीनाः क्षुद्रगुम्फविशिष्टाः वा श्मश्रुयुक्तगण्डदेशास्तु दृश्यन्ते। श्मश्रुयुक्तवारा नारायणीदेव्याः इति अपि कथ्यते, किन्तु देव्याः श्मश्रु कथं सम्भवति ? सम्भवतः व्राह्मणैः द्वितीयवारा तान्त्रिकदेविनारायण्याः इति घोषणामनु गुम्फाङ्कनं समाप्यते, श्मश्रवङ्कनं च प्राचीनरीत्या चलति। वाराद्वयं दक्षिणरायस्य इत्यपि न सम्भवति द्वयोर्मध्यात् पार्थक्यात्। गुम्फहीना वारा कस्यचित् अन्यदेवस्य आदिमस्य यः दक्षिणरायप्राधान्यकाले तत्पार्श्वे तिष्ठति, इत्यपि सम्भवति, यतः देवतयोः मिश्रितरूपं न विरलम्। एतदपि अवश्यमनुमानम्।

माणिकपीरः हिन्दुमुसलमानयोः काचित् लौकिकी देवता। तस्य पूजाहाजोतस्य कर्तारः मुसलमानफकिराः। ग्रामे गोमड़केषु हिन्दुमुसलमानाः गृहस्थाः सम्मिलिततया माणिकपीरस्य दरगायां पूजाहाजोतं ददति। कृषकाः भक्तिमन्तः गोः प्रथमदुग्धदाने प्रथमदिनदुग्धं माणिकपीरस्य दरगायाम् उत्सर्गं कुर्व्वन्ति।

गाजीपीरादयः मुसलमानैः उपास्याः भवितुमर्हन्ति, कथं हिन्दुनामपि चिन्तनीयम्। तत्कालीनैः मुसलमानशासकैः सम्वन्धवशात् ते हिन्दूनां भयपात्राणि भवितुमर्हन्ति , न तु भक्तिपात्राणि। सम्भवतः पीराः लोकधर्म्मविरोधिनः न आसन्। तत्कालीननरवलेः ते विरुद्धाः आसन्। पीरगो राचाँदपीरलोहानीत्यादीनां जीवन्याः तज्ज्ञायते। कदाचित् ते आसन् अलौकिकशक्तिमन्तः दक्षः कविराजः हाकिम् वा। जनाः तेभ्यः वहूपकारं प्राप्य सुफीवादस्य प्रभावात् च तान् देवतासु उन्नीतान् कुर्व्वन्ति।

सत्यनारायणः सत्यपीरः वा। अभिधानाज्ज्ञायते यत् हिन्दुमुसलमानाः अस्य पूजां कुर्व्वन्ति। वङ्गविहारोड़िष्याप्रदेशेषु पञ्जावस्य जलन्धरे दाक्षिणात्यस्य महीशुरे च अस्य प्राधान्यं दृश्यते।

शिरति मोकाम च फारसीशव्दः। सम्पूर्णतः सत्यनारायणपूजान्ते व्रतकथापाठकाले पठ्यते सत्यनारायणः सत्यपीरात् अभिन्नः इति। शङ्कर-आचार्यस्य 'সত্যনারায়ণের পুঁথি' इत्यस्मात् उद्धृतानि -

"একদা বৈকুণ্ঠধামে চিন্তে নারায়ণ।

মর্ত্যেতে কলহ সকল ধর্মের কারণ ॥

সকল আপদের সেরা ধর্মের কলহ।

পৃথিবী ভাসিয়ে যায় রক্ত অহরহ ॥

মিলাতে সকল ধর্ম কামনা আমার।

সত্যপীররূপে আমি হব অবতার ॥

ফকিরের বেশে আমি ধরায় যাইব।

নরধর্ম রীতি শিক্ষা প্রচার করিব ॥

কেহ বা ডাকিবে মোরে সত্যপীর বলি।

পীর আর নারায়ণ একই সকলি ॥"

पुनः पण्डितेन रामेश्वरभट्टाचार्येण 'সত্যনারায়ণের কথা' इति ग्रन्थे नारायणं विहाय पीरस्य चरणे प्रणिपातं कृतवान् -

"সত্য সত্য সত্যপীর সর্বসিদ্ধিদাতা।

বাঞ্ছা বড় বাড়িল বর্ণিব এব কথা ॥"

"জয় জয় সত্যপীর, সনাতন দস্তগীর।

দেব দেব জগতের নাথ ॥"

"কে জানে তোমার তত্ত্ব

তুমি রজঃ তমঃ সত্ত্ব

তোমার চরণে প্রণিপাত ॥"

भारतचन्द्ररायगुणाकरेण लिखितं 'সত্যপীরের কথা' -

"ফকির শরীর ধরি, হরি হইলা অবতারি,

এক বৃক্ষতলে কৈল স্থান।"

मध्ययुगपाँचालीकारेण कृष्णहरिदासेन उच्यते यत् सत्यनारायणः मनुष्यः आसीत्। मालञ्चराजकन्यायाः गर्भेऽजायत। शैशवे सत्यनारायणः राजगुरुं प्रदर्शितवान् किञ्चित् पुस्तकम्, यत् आसीत् मुसलमानानां धर्म्मकाव्यम्। राजगुरोः मतमासीत् यत् मुसलमानानां धर्म्मकाव्यं हिन्दुः न पठेत् तथा सति हिन्दोः जातिः नश्येत्। गुरोर्वाक्यं सत्यनारायणः न विश्वसिति -

"হাসিয়া কহিছে সত্যনারায়ণ

নাম নিলে জাতি নষ্ট করে কোন জন ॥

এক ব্রহ্ম ভিন্ন আর দুই ব্রহ্ম নাই ।

সংসারের কথা (ধাতা) এক নিরঞ্জন গোঁসাই ॥

সেই নিরঞ্জন নাম বিশমোল্লা হয় ।

বিষ্ণু আর বিশমোল্লা কভু ভিন্ন নয় ॥"

खीष्टीये पञ्चदशे षोड़शे शतके मुसलमानकवीनां सत्यपीरमाहात्म्यप्रचारककाव्येषु सत्यनारायणस्य सत्यपीरात् अभिन्नत्वं दृश्यते। फयेजुल्लाह् ओयाजिद् आलि तस्य सत्यपीरपाँचाल्यां 'सत्यनारायण' इति उल्लेखयति -

"সাত রোজ আমরা শিকার না পাই ।

বুঝিনু নছিব বুরা চল ঘরে যাই ॥
হেন কালে দেখা দিলেন সত্যনারায়ণ

ফকিরে দেখিয়ে তারা ফিরিল তখন ।"

देवमूर्तीनां पूजा प्रतीकपूजा वा हिन्दुधर्म्मे शास्त्रसिद्धा। इसलामे आल्लाह् विना अपरस्य कस्यापि पूजा निषिद्धा। कोराणे पीरवादः नास्ति। तथापि मुसलमानाः मृत्स्तूपं सत्यपीरं पूजयन्तीति दृश्यते। हिन्दुमुसलमानाः सत्यपीरमाराध्य तत्प्रसादि 'जलपड़ा' 'तेलपड़ा' हाकिमि औषधं मादुलीकवचं गृह्णन्ति। पीरप्रसादि वातासा एलाचेन सह ब्राह्मणाः अपि गृह्णन्ति। सत्यनारायणपूजायाः शिरनिप्रसादं मुसलमानाः अपि गृह्णन्ति। एतादृशी उदारता एकता पूजाचारे प्रसादग्रहणे च न दृश्यते।

उच्यते यत् हिन्दुमुसलमानेषु ऐक्यसृष्ट्यर्थं गौड़सुलतानः हुसेन शाह् संस्कृत 'सत्य'मनु आरवि 'पीर'शव्दम् उपवेशयित्वा सत्यपीरपूजाम् आरभते। सत्यनारायणसत्यपीरपूजा समन्वितः पूजाचारः। कथमेतत् सम्भवति शत्रुभावयोः हिन्दुमुसलमानयोर्मध्यात्।

১। भारते मुसलमानाधिकारमनु स्वधर्म्मरक्षणशङ्किताः हिन्दवः उदारान् मुसलमानगाजीजनान् प्रति श्रद्धालवः भवन्ति।

नवब्राह्मण्ययुगे निम्नवर्णीयाः हिन्दवः शास्त्रोक्तपूजायाम् अनधिकारिणः भवन्ति, पीरगाजीनां भेदविहीनं सरलजीवनं तान् आकर्षयति। लुप्तप्रायः वौद्धधर्म्मः तदा भिक्षुवंशधराः हिन्दुसमाजे प्रवेशाधिकारं न प्राप्तवन्तः। एते सर्व्वे मुसलमानाः न भवन्ति। किन्तु पीरान् प्रति आकृष्टाः भवन्ति। अतः सत्यपीरपूजायाम् अनुरक्ताः भवन्ति ते।

मुसलमानाश्चिन्तयन्ति यत् प्रतिवेशिभिः हिन्दुभिः सह शत्रुता उच्चवर्गीयान् मुसलमानान् लाभयुक्तान् कुर्व्वन्ति, न तु निम्नवर्गीयान्। अतः स्वधर्म्मं न त्यक्त्वापि समन्विते पूजाचारे सम्प्रदाययोर्मध्यात् विरुद्धता ह्रासप्राप्ता।

भारतीयाः मुसलमानाः प्रधानतः हिन्दुधर्म्मात् धर्म्मान्तरिताः। अतः पूर्वसंस्कारवशात् ते पूजाविरोधिनः न आसन्। अपि तु मुसलमानाः प्रायशः हिन्दुनारीः विवाहं कुर्व्वन्ति, नाभिः हिन्दुसंस्कारः मुसलमानानाम् अन्तःपुरं प्रविशति। मध्ययुगीयाः उदाराः धर्म्मवादाः ऐक्यसहायतां ददति। ১) मध्ययुगे वङ्गे सुफीवादः दरवेशानां प्रचारः वा २) काश्मीरस्य साधिकायाः लालवाक्यान्याः उदारः धर्म्मप्रचारः, ७) श्रीचैतन्यदेवेन जातिवर्णधर्म्मभेदानाम् अस्वीकारः 8) गौड़सुलतानस्य हुसेनशाहस्य हिन्दुमुसलमानयोर्मध्यात् मिलनप्रयासः ৫) वादशाह् आकवरस्य दीन्-इ-इलाही धर्म्मवादः ৬) आग्रायां स्वामिजीमहाराजस्य हुजुरमहाराजस्य च राधास्वामी सन्तवादः। ৭) समाजतत्त्वाज्ज्ञायते यत् द्वौ सम्प्रदायौ प्रथमसंस्पर्शे विरुद्धौ तिष्ठन्तौ क्रमेण एकत्रवासात् चिन्ताचेतनायां प्रभावितौ भवन्तः। ৮) कवीररामानन्दानाम् उदारः मिलनाकाङ्क्षी धर्म्मप्रचारः हिन्दुमुसलमानयोः मनसि प्रतिक्रियां सृष्टवान्।

धर्म्मठाकुरः सत्यनारायणे विवर्तितः। महाभारतवर्णितस्य सत्यविनायकस्य स्कन्दपुराणस्य रेवाखण्डे उल्लिखितस्य सत्यनारायणस्य पूजायाः प्रचलनं हिन्दुनां मध्यात् आसीत्, पश्चात् सत्यनारायणः सत्यपीरः भवति मुसलमानसमाजे। आदौ एकः उपास्यः भिन्ने परिवेशे उपासितः, भक्तविश्वासे पूजाचारे सादृश्यमतः।

आदिमध्ययुगे साधकपीरः मनुसुर हाल्लाद सत्यदर्शी धर्म्मनेता आसीत्, यः आत्मानं सत्यदर्शीति प्रचारयति। एतत्कारणात् सः स्वधर्म्मिभिः हन्यते। तस्य शिष्यास्तं 'सत्यपी'ति आख्यया आख्यायितं कुर्व्वन्ति। सः उपास्यः भवति। तद्भक्तानां प्रचारेण हिन्दुमुसलमानसमाजे सत्यपीरार्चनम् आरभते।

हिन्दुमुसलमानयोः एतदैव्यं न ज्ञातम् इसलामिकस्टेट ईत्यनेन। एकस्मिन् इसलामधर्म्मे शियासुन्नीविरोघः यदा लेलिहानः, तदा वङ्गदेशे क्षुद्रे हिन्दुमुसलमानयोः एकत्रोपासना धर्म्मसहिष्णुतायाः पराकाष्ठा भवति।

## Bibliography


1. বাংলার লৌকিক দেবতা – গোপেন্দ্র কৃষ্ণ বসু , দেশ পাবলিশিং , কলকাতা-৭৩, চতুর্থ সংস্করণ, জানুয়ারী ২০০৮ ।
2. হিন্দু ধর্ম – স্বামী নির্বেদানন্দ, রামকৃষ্ণ মিশন কলকাতা স্টুডেন্টস্ হোম, বেলঘরিয়া, জানুয়ারী ২০১১ ।
3. বিশ্বনবী – গোপাল মোস্তাফা, মহম্মদ পাবলিশিং হাউস, ঢাকা, জানুয়ারী ২০০৬ ।
4. জগতের ধর্মগুরু – রামকৃষ্ণ মিশন লোক শিক্ষা পরিষদ, নরেন্দ্রপুর, ২০০৪ ।
5. ভারতের অধ্যাত্ম সাধনা – নিগূঢ়ানন্দ সাহিত্যম্, কলকাতা, ২০০৪ ।
6. দেবদেবী ও তাঁদের বাহন – স্বামী নির্মলানন্দ, ভারত সেবাশ্রম সংঘ, কলকাতা, বাংলা ১৪১৮ ।
7. সৎপ্রসঙ্গ – স্বামী বিশুদ্ধানন্দ, উদ্বোধন কার্যালয়, কলকাতা, ২০০৬ ।